योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०७६

षट्सप्ततितमः सर्गः ७६

श्रीवसिष्ठ उवाच ।

अथ कल्पान्तमरुति वहत्यवधुताचले ।

बलेनाम्भोधिकल्लोलैर्नभस्यावर्तकारिणि ।। १

समुद्रेषु विमुद्रेषु मर्यादोल्लङ्घने घने ।

अधनेषु धनिष्वम्बुदारिद्र्योपद्रवद्रुते ।। २

भूतले भूतलेशांशवर्जिते वह्निभर्जिते ।

पातालमपि पाताले गते किमपि कालतः ।। ३

दिवि वा विद्यमानायां विशीर्णे सर्गवर्गके ।

लोके व्योमगतालोके शोकौकसि ककुब्गणे ।। ४

कुतोऽप्याकाशकुहराद्दृप्तदैत्यगणा इव ।

पुष्करावर्तका मेघाश्चक्रुर्गुलुगुलारवम् ।। ५

ब्रह्मविस्फोटितस्वाण्डकुड्यविस्फोटनोद्भटम् ।

अन्योन्यास्फालनोत्फालमत्तार्णवरवाविलम् ।। ६

लोकार्णवपुरोद्गीर्णघनकोलाहलोल्वणम् ।

एतत्कुलाचलस्कन्धबद्धोग्ररवघर्घरम् ।। ७

ब्रह्माण्डशङ्खजठरपूरणावर्तमन्थरम् ।

स्वर्लोकरोदःपातालतलतोऽतिसगुल्मकम् ।। ८

समस्तदूरदिग्भित्तिहेलाहेलनघर्षुलम्।

महाप्रलयसंपन्नापानकापानतर्षुलम् ।। ९

प्रसृतप्रलयाख्येन्द्रमत्तैरावतबृंहितम् ।

आकल्पक्षुब्धमेघाब्धिनिर्ह्रादमिव संभृतम् ।। १०

महाप्रलयसंक्षुब्धक्षीरोदमथनारवम् ।

ब्रह्माण्डोग्रारघट्टेऽस्मिन्वार्यन्त्रमिव सारवम् ।। ११

अथास्मिन्सति कल्पाग्नौ स्थितिमेति कथं घनः ।

इति विस्मितवानस्मि दृशं दिग्नवकेऽत्यजम् ।। १२

यावन्न क्वचिदेवात्र पश्याम्याशासु केवलम् ।

तरन्ति तरलास्फालमुल्मुकाशनिवृष्टयः ।। १३

तेन ज्वलनतापेन बहुयोजनकोटिषु ।

पदार्था भस्मतां यान्ति दूरे दिक्षु दशस्वपि ।। १४

अनन्तरं क्षणाद्व्योम्नि दूरेऽहमनुभूतवान् ।

ऊर्ध्वतः शीतलं वातमधस्तादनलोपमम् ।। १५

एतावति नभोमार्गे दूरे कल्पाम्बुदाः स्थिताः ।

यस्तेषामग्नितापानां विषयो न च सदृशाम् ।। १९

अथ वारुणदिग्भागादाययौ कल्पमारुतः ।

यस्मिंस्तृणवदुह्यन्ते विन्ध्यमेरुहिमालयाः ।। १७

तेन ज्वालाचलाः प्रान्तोड्डीनाङ्गारविहंगमाः ।

लोलोल्मुकवनाक्रान्ता जग्मुरग्निदिशं द्रुतम् ।। १८

संध्याभ्रसदृशाकारास्तेरुरङ्गारवारिदाः ।

भ्रेमुर्भस्मभराभ्राणि पूताङ्गाररजांसि खे ।। १९

स ज्वालविलसद्वातो दुष्टोऽनलदृशं व्रजन् ।

हेमाद्रीणां सपक्षाणामनीकं द्रवतामिव ।। २०

धराद्रिमण्डलाभोगे सौम्याङ्गारभरात्मनि ।

ज्वालावलिगणे जाते भाते तेजसि भास्वताम् ।। २१

अर्णवेष्वनलार्णस्सु क्वथनोत्फालवारिषु ।

वनेष्वस्मृतपर्णेषु दीप्ताग्नितरुधारिषु ।। २२

ब्रह्मलोकस्थनाथेषु ब्रह्मलोकपुरेषु च ।

साङ्गनाबालवृद्धेषु दग्धेषु निपतत्सु खम् ।। २३

कल्पान्तानलपद्मिन्या ब्रह्माग्रावसरोवरे ।

ज्वालापल्लवशालिन्याः सबीजायाः सटोल्मुकैः ।।२४

अनिलात्मसु मूलेषु नागेषु च नगेषु च ।

आपातालं निमग्नेषु महत्यङ्गारकर्दमे ।। २५

उष्ट्रसैन्यमिवालक्ष्य गतिमन्निकटं नभः ।

आययावञ्जनश्यामः कल्पाम्बुदगणः क्वणन् ।। २६

स्थिरकल्पानलज्वालातुल्यविद्युन्मयाचलः ।

एककोणकविश्रान्तसप्तार्णवपयोभरः ।। २७

भित्तिभासुरनीहारभारनिर्वारिदिक्तटः ।

ब्रह्माण्डकुड्यनिविडमण्डलास्फोटपण्डितः ।। २८

कल्पान्तक्षुभिताम्भोधिर्वर्तुलावर्तवृत्तिमान् ।

तडिज्जलचरः सारनिर्ह्रादः खमिवागतः ।। २९

मृतो दग्धो निशानाथस्ततो द्विगुणशीतलः ।

अन्यमाकारमाश्रित्य परं लोकमिवागतः ।। ३०

हेमसंभाररूपेण हिमालयमिवाखिलम् ।

जाड्यस्तम्भितनिःशेषजलकाष्ठाचलं दधत् ।। ३१

अथ ब्रह्माण्डविस्फोटकठिनं घटिताम्बरम् ।

प्राग्द्रुतोद्भटतौषारकाष्ठा वृष्टिः पपात ह ।। ३२

अग्निदाहवनाकाशविद्युदुन्मेषभीषणा ।

चटद्भडगडास्फोटस्फुटद्ब्रह्माण्डमण्डला ।। ३३

प्रथितोत्थितसीत्कारशतक्ष्वेडाक्षयारवा ।

शीतसीकरनीहारभित्तिबन्धमयाम्बरा ।। ३४

रोदोमण्डपवैदूर्यस्तम्भसंभारभासुरैः ।

धारासारैर्धराधुर्यशैलशातकशालिनी ।। ३५

धराचटचटास्फोटस्फुटदङ्गारपत्तना ।

गर्जितोर्जितसंपातपतल्लोकान्तराकुला ।। ३६

सा बभूवाथ साङ्गारजगद्गेहविलासिनी ।

कृतप्रत्युद्गमा वाष्पश्रियाऽज्वलनया भुवः ।। ३७

ज्वालालवोल्ललनडम्बरमम्बरं त-

द्व्यूढस्थलाब्जदलजालमिवालमासीत् ।

ज्वालाभ्रमद्भ्रमरपङ्क्तिनिभास्तदासं-

स्तत्र स्फुरच्छिशिरसीकरपक्षपुञ्जाः ।। ३८

उद्यद्बृहच्चटचटारवपूरिताशो

भीमोऽभवत्सलिलदानलसंनिपातः ।

दुर्वारवैरिविषमो महतां बलानां

संग्राम उग्र इव हेतिहतोग्रहेतिः ।। ३९

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मी० दे० मो० निर्वाणप्रक० उत्तरार्धे पाषा० पुष्करावर्तडम्बरवर्णनं नाम षट्सप्ततितमः सर्गः ।। ७६ ।।